॥ श्रीः ॥

# समुद्रयानादिप्रायश्चित्तम् ।

(राणामूलजी श्रेष्ठिवर्य, रणछोडश्रेष्ठिवर्ययोः)

श्रीमत्परमहंसपरिव्राजकाचार्यपदवाक्यप्रमा-
णपारावारपारीणत्वाद्यनेकपदाङ्कितश्रीम-
ज्जगद्गुरुशंकराचार्यश्रीमद्द्वारकामठा-
धीश्वरश्रीमन्माधवतीर्थवर्यै-
राज्ञप्तम् ।

श्रीमच्छंकरभगवत्पूज्यपादाचार्याणा-
मवतारशकाब्दाः २३७४.

"श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालये
मुद्रितम् ।

मुंबई.
संवत् १९६१, शके १८२६.

S. V. S. P. BOMBAY.

॥ श्रीशारदाम्बा विजयतेतराम् ॥

श्रीद्वारकाधीशो विजयते
जगद्गुरु श्रीमच्छङ्कराचार्य
श्रीशारदामठ द्वारकासंस्थाना-
धीश्वर महा०

इह खलु ब्राह्मणादीनां प्रत्यासन्नसमारम्भसंसाधनैकनिकामानां महोद्यमामोदपरिचोदितान्तरङ्गाणां महायनयानियन्तृत्वमहाभिषग्वरत्वाद्यनितरोपायालभ्यासाधारणविद्याकलाकौशलयसम्पादनेहातुन्दिलान्तःकरणानां प्रत्यन्तदेशगमनसागरयानद्वीपान्तरपर्य्यटननिमित्तप्रायश्चित्तविमर्शप्रस्तावे--किं विशेषविमर्शमन्तरेण सर्वे सर्वदा प्रायश्चित्तार्हा उत कञ्चन विशेषमाश्रित्य कदाचित् केचिदेव वा, तथा तदर्हानर्हतायां के नियन्तारो विशेषहेतवः, एवं कृतनिष्कृतयः सजातीयैः संव्यवहार्या भवेयुर्न वेत्याद्याः प्रवर्तन्ते जिज्ञासाः ।

अत्रोच्यते—न तावदमर्यादासमभ्यक्ताक्षेमङ्करव्यवहारप्रसक्तास्तदर्हा अन्ये तत्रनुग्रहार्हा इत्यवगम्यते ।

ननु केऽत्र नियन्तारो विशेषहेतव इति चेद् अभक्ष्यभक्षणागम्यागमनापेयपानादिविरहाविरहविमर्शा एवेति वदामः ।



नन्वेवं सति कुतःप्रायश्चित्तप्रसक्तिरिति चेत् समुद्रयानम्लेच्छदेशावासादिनिमित्तपापापनुत्त्यर्थमित्यवधेहि । तथा चोक्तं हेमाद्रौ प्रायश्चित्तखण्डे मरीचिना "मासं कारागृहे वासो नौभिर्यात्रा दिनत्रयम् । म्लेच्छावासे तथा पक्षं यो वसेत्स तु पातकी" इति । एवञ्चानन्यलभ्ययथोक्तमहोद्यमावाप्त्यभिलाषमहामोदपरिरम्भसम्भ्रमवशेनाब्धियानम्लेच्छदेशावासद्वीपान्तरपरिचङ्क्रमणेऽपि ये स्वाहारादिपरिरक्षणधुरीणास्त एव प्रायश्चित्तार्हाः ।

ननु "द्विजस्याब्धौ तु नौयातुः" इत्यादिना कृतनिष्क्रियाणामप्यसंव्यवहार्यत्वोक्तेस्तत्प्रयुक्तप्रायश्चित्तविमर्शोऽपार्थक एवेति चेन्न । उदाहृतवाक्यानामन्यत्र सावकाशानां प्रकृते निरवकाशत्वेन चोद्यानवतारात् ।

यत्तु केनचिदप्रबुद्धप्रतारकेणानाघ्रातानिगमागमकुसुमसौरभेणाबुद्धिकृतैनस एव प्रायश्चित्तं न तु बुद्धिपूर्वकृतस्येति प्रलप्यते, तत्तुच्छम् । "कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनाद्" इति वदता मनुना "कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा । ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवं स्मृतम्" इत्यगम्यागमननिमित्तप्रायश्चित्ताभिधायिमिताक्षराग्रन्थसन्दर्भेण बुद्धिपूर्व

कृतस्यापि प्रायश्चित्ताभिधानात् । अन्यथा परदारादिगमननिमित्तप्रायश्चित्ताभिधायिग्रन्थसन्दर्भस्य समुच्छेदापत्तेः । परदारागमनादिकमबुद्धिपूर्वमिति पामरेणापि वक्तुमशक्यत्वात् । सुप्रसिद्धश्चैतन्मनुयाज्ञवल्क्यपराशरादिधर्मशास्त्रेषु हेमाद्र्यादिसमस्तनिबन्धग्रन्थेषु चेति दिक् ।

किञ्च यदत्र वक्तव्यमन्यत्तत्सर्वमस्मदीयपूर्वाचार्यकृतायां पर्य्यटनमीमांसायां विवेचितमाज्ञापितञ्च— यथोक्तलक्षणनियोज्यस्य यथोक्तविषये प्रायश्चित्तं, कृतप्रायश्चित्तस्य संव्यवहार्यत्वञ्चेति तत्सर्वं तत्रैव द्रष्टव्यमित्यलं प्रसक्तानुप्रसक्त्या ।

अथैवं यथोदितविषयपर्य्यालोचनया सागरयानम्लेच्छदेशावासद्वीपान्तराभिगमनलक्षणविलक्षणक्रियाव्यासङ्गवतामापाततो दूषणप्रसञ्जनसत्त्वेऽपि तदंशेऽनिष्ठितप्रमाणवाणीमाकाङ्क्षामः, यथा वयं व्यपेतसन्देहाः प्रायश्चित्तं चरेमेतिचेदत्राचक्ष्महे । यद्यप्यमुष्मिन्नर्थेऽस्ति स्मृतीनां घण्टाघोषः । तथापि सद्यःसन्धानाय प्रत्याययिष्यामः स्मृतिरश्मिविभेदम् । तथाहि "पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः । यानि दक्षिणतस्तानि व्याख्यास्यामः ।" "यथैतदनुपेतेन



सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनमिति ।" "अथोत्तरत ऊर्णाविक्रयस्सीधुपानमुभयतोदद्भिर्व्यवहार आयुधीयकं समुद्रसंयानमिति ।

अथ पतनीयानि सीधुपानं समुद्रसंयानं ब्रह्मस्वन्यासापहरणं भूम्यनृतं सर्वापण्यैर्व्यवहरणं शूद्रसेवनं शूद्राभिजननं तदपत्यञ्च एषामन्यतमत्कृत्वा "चतुर्थकालम्मितभोजिनः स्युरपोभ्युपेयुः सवनानुकल्पम् । स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैस्तदपघ्नन्ति पापमिति ("यदेकरात्रेणकरोति पापं कृष्णं वर्णं ब्राह्मणः सेवमानः । चतुर्थकाल उदकाभ्युपायी त्रिभिर्वर्षैस्तदपघ्नन्तिपापमिति) इस्माह भगवान्बौधायनः" । सीधुपानं सुरापान मित्यर्थः । समुद्रयानमिति या प्रापणे—इत्यस्मात्सम्पूर्वाद् यात्यनेनेत्यस्मिन्नर्थे करणाधिकरणयोश्चेति ल्युटा संयानमिति रूपमभिजायते समुद्रस्य संयान समुद्रसंयानं समुद्रविहारप्रयोजकनौकागमनपर्यन्तोऽजहत्स्वार्थलक्षणयार्थोऽवगम्यते । इत्थञ्चानन्यानिष्ठसंयानसामान्यनिवृत्तस्वरूपस्य पातित्यापादकत्वं दुराधमेवेत्यवधेयम् । अवशिष्टसूत्रभागव्याख्यानं प्रकृतानुपयोगीति विरम्यते ।

न चोर्णाविक्रयपुरोगमानां सदा सर्वत्र रचाप्रचराणां पातित्यप्रयुक्तनिष्कृतिसमाचारानुभूत्यभावे किमिति तत्समुदायैकतमसमुद्रसंयानस्यैव प्रायश्चित्तार्हतोपपाद्यत इति शक्यं नियोक्तुम् । व्यापारेषूर्णाविक्रयादिषु स्वस्वसन्नियतदूषणाधानसमर्थनस्य समुचितत्वेपि समुद्रसंयाने नूनमेभ्यो निग्रहार्हं भूयोदूषणगोचरता परं जञ्जन्यते, जोहोर्तिच तदास्पदीभूतविक्रियावैजात्यं, मोमोर्ति च निर्मृष्टाशेषस्वस्त्ययनप्रत्यनीकभूतप्रयोगैराजिः, दोधूयन्तेच ध्वजान्ताः सदध्वविजयस्तम्भमौलीनाममन्दमिति परिष्करोतु मतिमत्तामुदासीनोऽपि । ऊर्णादिव्यवहारकोटिनिविष्टत्वेपि सीधुपानसमुद्रसंयानघोरन्यादृशस्वरूपमवसेयम् । तत्रापि तारतम्यविचारणायामुभयोः समसत्ताकत्वमेव फलतः सम्प्रधार्यते ।

न चोर्णादिवत्तान्निरूपितवैलक्षण्यमाञ्जस्येनैव समुद्रसंयानेऽपि किं न स्यादिति वाच्यम् । तद्यानादौ प्रवृत्तं प्रति सीधुपानानभ्यवहार्यकर्मणोरत्यासन्नव्यवहारतया तत्प्रसक्तिः स्वाभाविकी। तथा च बौधायनस्मरणमयूखमाला प्रत्यवायतमस्तोमापहन्त्री निरातङ्ककैङ्कर्याधिकरणा ज्ञातव्या। इत्थञ्च समुद्रसंयानादिजन्मनः पातित्यलक्षणबन्धनान्मुमोचयिषया प्रवृत्तां मातापितृशते-



भ्योऽपि वत्सलतरां भगवतीं श्रुतिं चतुर्थकालेत्याद्यामुदाजहार परमकारुणिको मुनिग्रामणीः । पतनीयानाममीषां समुद्रसंयानोपक्रमतदपत्यपर्यन्तानां सप्तानामितरेतरस्वरूपवैधर्म्यसौक्ष्म्यातिशयसम्भवेऽपि पतनीयताप्रयोजकधर्मविशेषस्य सप्तस्वनुगततया तत्पुरस्कारेण मुख्यमेकमेव प्रायश्चित्तं प्रख्याप्यते सूक्ष्मेक्षिकयैतयर्चा ।

एवं च समुद्रसंयानादिप्रभवपातकापहारं प्रत्यप्यसत्यदीर्घकालिकसमाचारे त्र्यब्दप्रायश्चित्तपरिप्राप्तिरपरिहार्या। समुद्रसंयानोपलक्षितद्वीपान्तरप्रयाणादिजन्मानं प्रति पातित्यापादकदोषविशेषमेतदेव हि प्रायश्चित्तमर्थसिद्धम्। तथा च सागरसंयानम्लेच्छदेशावासद्वीपान्तरपर्यटनादिप्रवृत्तिमतां मधुमांसाशनादिप्रत्यक्षप्रवृत्त्यनङ्गीकारेऽपि सर्वथा तद्द्वयावृत्त्यसम्भवेन त्र्यब्दप्रायश्चित्तविधानमत्यादरगोचरमुन्नीयते ।

एवञ्च कायिकसामर्थ्ये सति चतुर्थकालेत्यादिश्रुत्युन्नीतसाधनानुष्ठानमेव श्रेयःसाधनायालं नान्यत्तथा । उक्तानुपपत्तियाथात्म्ये त्रिभिर्वर्षैस्तदपघ्नन्ति पापमितिश्रुतिघटकपदेभ्यस्त्रिसांवत्सरिकप्रायश्चित्तानुष्ठानप्रतिनिधितया प्राजापत्यकृच्छ्रचान्द्रायणा-

दिकमनुगृहीतं भवति । तेषामप्यनेकप्रकारभेद-भिन्नानां कृच्छ्रादीनामधुनातनमानववपुःपाटवादि-पर्यालोचनयैकस्याप्यव्यग्रमनुष्ठानं प्रभवेदर्थयितुं न वेति सन्दिहानाः प्रत्यब्दं त्रिंशत्प्राजापत्याश्चान्द्राय-णानि च त्रीणि सन्तीति त्रिभिर्वर्षैः सङ्कलनया नवतिः प्राजापत्यानां नवकं चान्द्रायणानामिति सङ्ख्या-मत्यासन्नामप्युपशमय्य तेषामनुकल्पानेव साभि-प्रायमनुजानीमहे । तथाहि-"प्राजापत्यव्रताशक्तौ धेनुं दद्यात्पयस्विनीम् । धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥" "धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुरा-णिका । कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्तिता "इ-ति स्मर्यते । एतदुक्तं भवति। चतुर्थकालेत्यादि श्रुत्युक्त-त्रैवार्षिकव्रतं, यद्वा, नवतिप्राजापत्यास्तदनुष्ठानाशक्तौ नवतिदोग्धृधेनुदानं, तत्राप्यशक्तौ तन्मूल्यभूतसार्द्ध-द्वादशोत्तरशतरौप्यमुद्रादानमिति त्रयः पक्षाः समु-दिता भवन्ति ।

यद्यप्येतदर्थं यथोपन्यस्तप्राजापत्यानामेव प्राय-श्चित्तश्रुत्यर्थस्वारस्यमहिम्नावश्यानुष्ठेयता तावदवि-प्रतिपन्नप्रमाणभावमर्हति । तथापि म्लेच्छदेशाधिवा-सादीनां यथोक्तश्रुत्या कण्ठरवेणानुद्यमानतया तदंशे



प्रायश्चित्ताधिक्यं वक्तव्यमेव । तदभावे तदंशामय-स्यानुवृत्तिरपरिहार्यैति केषाञ्चित्सम्भ्रमः स्यात्तदत्र प्रतिविधीयते म्लेच्छदेशाधिवासादिजनितामयपरि-मार्जनपार्थक्येन । तथाहि—" म्लेच्छावासे तथा पक्षं यो वसेत्स तु पातकी" इतिउक्त्वा पूर्वोक्तमरीचि स्मृत्युन्नीतपातकपरिमार्जनप्रकारः हेमाद्रौ प्रायश्चित्त-खण्डे "प्राजापत्यश्च चान्द्रश्च चरेत्संवत्सरोषितः" इति गौतमेनोक्तःउक्तः । म्लेच्छावास इत्यनुवर्तते तत्प्रकर-णस्थत्वात । किञ्च " अनादिष्टेषु पापेषु शुद्धिश्चान्द्रा-यणेन तु" इत्यादियाज्ञवल्क्याद्यनुशासनेभ्यश्चा-न्द्रायणादेरपि प्राप्तिः प्रमाणिकी म्लेच्छावासनिवासा-दिवेलायामनेकविधवर्जनीयसङ्गप्रसङ्गस्य दुष्परि-हरत्वात् । तदेवं चान्द्रायणादीन्यपि प्रमाणप्रतीति-गोचरत्वान्नोपेक्षामर्हन्ति । अन्यथा कर्मणो वै-गुण्यापत्तेर्दुर्धरत्वात् । तथा च प्रजापत्यवत्तिसृभिः समाभिर्नवकश्चान्द्रायणानामुद्गृहीतं भवति । तत्रा प्यनुष्ठानाशक्तौ तत्प्रत्याम्नायभूतगोदानानि प्रति चान्द्रायणं ह्यष्ट (८) सङ्ख्याकान्यवक्लृप्तानि सन्ति । सङ्कलनया नवसङ्ख्यानाञ्च तेषां द्विसप्तति(७२)सङ्-ख्याकान्यभिजायन्ते गोदानानि। तत्रापि पुनरसामर्थ्ये तन्मूल्यभूतनवति (९०) रौप्यमुद्रिकाप्रदानं विधीयते

प्रकृतप्रायश्चित्तपरिशिष्टनिष्क्रयाणां विचारणया । अन्यदपि दिव्यतीर्थविहरणादिकं यथायथमूह्यमिति सङ्क्षेपः ।

इत्थञ्च समुद्रयानम्लेच्छदेशाधिवासद्वीपान्तरभ्रमणवतो बांराभायेत्युपनामकश्रेष्ठिवर्यभवानीदासात्मजमूलजि,वोरोपनामकपरमानन्ददासात्मज रणछोडदासेत्येतयोर्वैश्यवर्य्ययोर्यथावक्लृप्तत्रैवार्षिकप्रायश्चित्तमुपदिष्टं भवति । दीर्घकालतदनुष्ठानाशक्तौ यथोपन्यस्तप्राजापत्यचान्द्रायणादिव्यतीर्थविहरणाद्यन्तान्यनुकल्पभूतान्यनुज्ञातानि भवन्ति । किञ्च "यागादौ च तुलादाने प्रायश्चित्तेषु कर्मसु । श्राद्धं कुर्याद्वैष्णवाख्यं सर्वदोषोपशान्तिदम् ॥" "प्रायश्चित्तेषु सर्वेषु जीवत्स्वपि तुलासु च । तत्काले वैष्णवश्राद्धं कृत्वा कर्म समापयेत् ॥" "प्रायश्चित्ते विवाहादौ तुलादानादिकर्मसु । पूर्वेद्युर्वा तदानीं वा नान्दीश्राद्धं समाचरेद्" इति देवलगौतममरीचिस्मृतिभिः प्रकृतप्रायश्चित्ते वैष्णवश्राद्धं नांदीश्राद्धं चात्यावश्यकमिति प्रतीयतेऽतस्तदपि कार्यम् । प्रत्यक्षगोदानमपि शक्यानुष्ठानश्चेत्तदपि महाफलाय कर्त्तव्यमेव ।

यथोक्तप्रायश्चित्तानुष्ठानं परिषदधिवेशनपुरःसरं



कार्यम् । अन्यथा प्रत्यवायानिवृत्तिः । यथोक्तं सर्वं यथावदनुष्ठेयम् । अयथावदनुष्ठाने अभयतस्खलनरूपोपप्लवापत्तिरिति सुधीभिरवधेयम् ।

एवं प्रायश्चित्ते निर्णीते तद्भूमिकापि दिङ्मात्रेण प्रदर्श्यते । तथाहि—मासस्वशेषेषु च सितासितपक्षयोरविशेषेण तदारम्भोपपत्तिःतत्र चाष्टमीचतुर्दश्योस्तिथ्योर्वासरयोश्च मन्दभौमयोरनारम्भ इत्येतावान्विशेषः । तीर्थक्षेत्रादौ तन्निर्वर्तनं वीर्यवत्तरं, विप्रकृष्टतमे तस्मिन्गोष्ठं वा तत्कर्मयोग्यताकमनुगृह्यते । गुरोःसन्निधानेऽपि तद्योगो योग्यो भवति । स्मर्यते च "नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणम् । शनिमंगलयोश्चापि न कर्तव्यं कदाचन ॥ अनुपोषितरात्रिश्च तीर्थान्यनभिगम्य च । अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते ॥ गुरुः परतरं तीर्थमतस्तीर्थं न विद्यते" इति संवर्तविष्णुगौतमैः ॥ पूर्वस्मिन्नहनि संकल्पपूर्वकं वपनं विधायाज्यं पयो वा प्राश्य संक्लृप्तकालसंङ्ख्योल्लेखपूर्वकंहि संकल्पो विधातव्यः । तथा च श्रूयते केशश्मश्रु वपते नखानि निकृन्तति दतो धावते" इति, सूत्र्यते च "केशश्मश्रूणि वापयेयुः-नखानि च । मृदादिभि दशभिर्द्रव्यैः यथाश्रुतं

स्नायात् । भगवन्तमनुस्मरेत् । नातिरिक्ता वाचो वदेयुः । न शूद्रेण सम्भाषेरन् । न स्त्रीभिः सह संवसेयुः । न दन्तान्दर्शयेरन् । सन्धिवेलयोर्वाचं यच्छेयुः” इत्येवमादि । तदेतन्नियमानुपालनपुरस्सरं परेद्युः पुनररुणोदये स्नात्वा यथावदीश्वरं स्मरन् पूर्वाभिमुख उत्तराभिमुखो वा भूत्वा कुशानास्तीर्य तदुपरि प्रायश्चित्तद्रव्याणि संस्थाप्य दर्भपवित्रपाणिराचान्तः प्राणानायम्य देशकालौ सङ्कीर्त्य ममामुकगुप्तस्य वैश्यजातिपतननिमित्तभूतसमुद्रयानम्लेच्छदेशाधिवासद्वीपान्तरप्रवसनाद्युपचितोपपातकमहापातकापात्रीकरणमलिनीकरणादिदुरितक्षयार्थं वैश्यजातियोग्यस्वधर्मानुष्ठानाधिकारसिद्ध्यर्थं च त्रैवार्षिकव्रताद्यनुकल्पभूतप्रायश्चित्ताख्यं कर्म करिष्य इतिसङ्कल्प्य यथोपन्यस्तविधिना प्राजापत्यचान्द्रायणादिब्राह्मणसन्तर्पणपर्यन्तं कर्म यथाधिकारं निर्वर्त्य स्वस्त्ययनं वाचयित्वा शिष्टैरनुज्ञातः स्वयं भुञ्जीत । निजनिकेतनं यात्वा यथाविभवं सविनयं सप्रार्थनञ्च ज्ञातीन् स्त्रीयान् क्षमाप्य भोजयेत् । नातः परं प्रसज्येत यथोदीरितप्रत्यवायजनिकासु क्रियासु । अन्यथा कुञ्जरशौचप्रक्रियेव कृतानुग्रहनिग्रहाणामप्युपहासपात्रतापत्तिरपरिहार्यप्राया । न हि पंक्तिपावनाः पाङ्क्तिदूषणप्रतीतिमत्ता-



मापन्नैरस्माभिः सह भोजनादिव्यापारानविगीतान्मन्येरान्निति नात्मावमन्तव्यः । कृताघविमोकान्युष्मानुत्तरकालिकाक्रियानैर्मल्यमनुसन्धास्यमानास्तद्वाचरनिरपवादप्रत्यये सत्सङ्गध्यादिसंव्यवहारैरनुगृह्णीयुरेव करुणामहार्णवाः सजातीया इत्याज्ञापयामः । श्रोत्रिया अपि भोजयितव्याः । “श्रोत्रिया यत्र नाश्नन्ति न देवास्तत्र भुञ्जते । श्रोत्रियेभ्यः परं नास्ति दैवतं पावनं महद्”इति गौतमस्मृतेराचाराच्च न प्रायश्चित्तीयजनविशेषविषयासंव्यवहार्यतानिबन्धनाग्रहातिशयः श्रोत्रियाणामतो न भवत्येव दोषाधायकः ।

अपरश्चय इमे रणछोडगुप्ताः सपरिवारा विगीतयौनसम्बन्धिसंसर्गदूषिताः स्वजातीयैः परित्यक्तसत्सङ्गध्यादिव्यवहारेण जन्मत एव बहिष्कृताः सीदन्तीति नैतच्चित्रं, विगीताविगीतसंसर्गयोरितरेतरप्रत्यनीकभावस्य साहजिकत्वात् ।

एवञ्च सति कोत्र पावनहेतुरिति जिज्ञासायां प्रकीर्णकप्राक्रियोक्ताघविमोचनहेतुभूतेषु प्रकृतानुकूलमूहनीयम् । तथा चोक्तं—“संसर्गमाचरन् विप्रः पतितादिष्वकामतः । पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा”इत्यारभ्य“भवेदूर्ध्वन्तु तत्समः”इत्यन्तेन परा-

शरस्मृतिग्रन्थसन्दर्भेण । तथा "भोजनाशनशय्यादि कुर्वाणः सार्वकालिकम्"इति मिताक्षरायाम् । एवञ्च दीर्घकालिकपतितसंसर्गस्य प्रायश्चित्ताभावो ध्वन्यते। तथापि स्मृतिमुक्ताफले प्रायश्चित्तकाण्डे क्रमेण सुमन्तुकामधेनुकर्तृभ्यां कलौ संसर्गविशेषदोषात्यन्ताभावस्य प्रतिपादनात् "त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् । द्वापरे कुलमेकं तु कर्तारं तु कलौयुगे" इति पराशरोक्तेश्च पूर्वोक्तं युगान्तरविषयकमित्यवगम्यते । तथाप्युत्पथसंसर्गव्यवहारसंकोचनार्थं सपत्नीकस्य तस्य चान्द्रायणद्वयं गोद्वयप्रदानञ्च कार्यमित्यभ्यनुजानीमहे ।

यदत्र सर्वेतरविलक्षणव्यवहारप्रवृत्तिः प्रतीयते शावाशौचे प्रायश्चित्तविधानरूपा विगीतव्यवहारप्रतीतिमत्तयेति, यच्च बहिष्कृतस्याघनिर्मोकप्रयोजनीभूतप्रायश्चित्तानुष्ठानात्प्रागौर्ध्वदैहिककर्मानुष्ठानं शास्त्रविरुद्धमविगीतशिष्टाचारबहिर्भूतञ्चेति यथानुष्ठितं,तत्सर्वं मृतप्रसूप्रसवक्रियावन्निष्फलमेवेत्यघनिर्मोकप्रायश्चित्तानुष्ठानोत्तरं पुनरावर्तनीयम् । अन्यथा संव्यवहार्यो भवेन्नवेति विवेचनीयं स्यान्मतिमाद्भिः ।



परमत्र कर्तुरपराधमननुसन्धाय कारयितुरेव तदित्यनुसन्दधानाः स एव प्रायश्चित्तार्हो बहिष्कार्यश्चेत्यभ्यनुजानीमहे ।

किञ्च प्रकृतौर्ध्वदैहिकक्रियासाङ्गतासम्पत्तिप्रयोजकीभूते ब्राह्मणभोजने ये भोक्तारस्तेऽपि प्रायश्चित्तार्हा एवेति यावन्न तत्कुर्वन्ति तावद्बहिष्कार्या इत्यप्यभ्यनुजानीमहे ॥

इति शिवमुभयतो भूयात् । श्रीमत्परमहंसपरिव्राजकाचार्यपदवाक्यप्रमाणपारावारपारीणत्वाद्यनेकपदाङ्कितजगद्गुरुश्रीमच्छङ्कराचार्यश्रीशारदापीठद्वारकासंस्थानाधीश्वरश्रीमन्माधवतीर्थस्वामिभिर्निर्णीतोऽयमर्थः ॥ श्रीमच्छङ्करभगवत्पूज्यपादाचार्याणामवताररशकाब्दाः—२३७४ । श्रीविक्रमशकाब्दाः—१९६१ पौषशुक्लत्रयोदश्यां गुरुवासरे । स्थितिः साम्प्रतिकी महाम्बानगर्य्याम् ॥

१ सम्मतोयमर्थः काशीशेषवेङ्कटाचलशास्त्रिणः ।

२ सम्मनुत इममर्थं मुधोळकरोपाह्वकट्युपाभिध—

श्रीनिवासाचार्यः ।



॥ श्रीः ॥

# समुद्रयानादिप्रायश्चित्तम् ।

( राणामूलजी श्रेष्ठिवर्य, रणछोडश्रेष्ठिवर्ययोः )

श्रीमत्परमहंसपरिव्राजकाचार्यपदवाक्यप्रमा-
णपारावारपारीणत्वाद्यनेकपदाङ्कितश्रीम-
ज्जगद्गुरुशंकराचार्यश्रीमद्द्वारकामठा-
धीश्वरश्रीमन्माधवतीर्थवर्यै-
राज्ञप्तम् ।

श्रीमच्छंकरभगवत्पूज्यपादाचार्याणा-
मवतारशकाब्दाः २३७४.


"श्रीवेङ्कटेश्वर" ( स्टीम् ) यन्त्रालये
मुद्रितम् ।

मुंबई.

संवत् १९६१, शके १८२६.

S. V. S. P. BOMBAY.